# त्रयोदशः पाठः

# सङ्घे शक्तिः

प्रस्तुतः पाठः पं. नवलकिशोरकाङ्करेण विरचितः प्रबन्धमकरन्दात् समुद्धृतः। रचनाकारस्य जन्म १९१० तमे ईस्वीयेवर्षे जयपुरे अभवत्। शिक्षां गृहीतवता नवलकिशोरेण स्वकीयप्रतिभाबलाद् गद्य-पद्यरचनायां प्रावीण्यमधिगत। शास्त्रसर्वस्वम्, प्रबन्धामृतम्, प्रबन्धमकरन्दश्च इत्यादयः निबन्धसंग्रहाः संस्कृतसेविसमाजे सुतरां समादरणीयाः सन्ति। कविभूषणः, कविशिरोमणिः, विद्यावाचस्पतिः, महामहिमोपाध्यायः, गद्यसम्राट्-शास्त्रमार्तण्डेत्यादिभिरुपाधिभिरेते व्यूभूष्यन्त। १९८५ ई. वर्षे भारत-राष्ट्रपतिना सम्मानिताः इमे। एतेहि राष्ट्रीय-भावनानां प्रबलाः पोषकाः आसन्।

पाठेऽस्मिन् संगठनशक्तेः माहात्म्यं वर्णितमस्तिम्। धनधान्यसुसम्पन्नं स्वर्णरत्नमयाकरं राष्ट्रम् अपि सुसंहतिं विना विभवास्पदं न भवेद्। सुसङ्घटितजीवनम् एव राष्ट्रभावस्य कारणं भवति। लोके लोकसङ्घटनम् आततायिनां परिध्वंसने सुदर्शनचक्रवत् नूनम् आयुधमैश्वरम्।

ईशोपनिषदि अपि कथ्यते- **'सम्भूत्याम् अमृतमश्नुते'** अर्थात् संगठनेनैव अमृत-तत्त्वस्य प्राप्तिर्भवति। संगठनस्य महत्त्वस्य प्रतिपादनं कृत्वा डॉ. श्रीधर-भास्कर-वर्णेकरः कथयति -

**अपारभूमिविस्तारमगण्यजनसंकुलम्।**
**राष्ट्रं सङ्घटनाहीनं प्रभवेन्नात्मरक्षणे।।**
**विपत्सु वज्रधैर्याणां संग्रामेवज्रदेहिनाम्।**
**सङ्घो राष्ट्रविपत्काले सद्वज्रकवचायते।।**

नारायणपण्डितः हितोपदेशे कथ्यते-

**अल्पानामपिवस्तूनां संहतिः कार्यसाधिका।**
**तृणैर्गुणत्वमापन्नैः बध्यन्ते मत्तदन्तिनः ।।**

पुरातनकाले कृतयुगे या शक्तिः मन्त्रप्रयोगे आसीत्, त्रेतायां या तन्त्रसाधने आसीत् द्वापरे च या व्यूहरचने आसीत्, सा हि शक्तिः कलौ सङ्घेः सङ्घीभूता। अतः साधूच्यते **"सङ्घे शक्तिः कलौ युगे"** -

स्वभावतः एव मानवाः सर्वत्र विजयं कामयन्ते, किन्तु विचारणीयोऽयं विचारो यत् कामनामात्रेण किं कश्चन स्वकर्मणि प्रयत्नं विना साफल्यं लभते ? शक्तिद्वारैव सर्वं कर्तुं शक्यते। माताऽपि तनयं रोदनं विना न स्तन्यं पाययति। जगति यो यावान् शक्तिमान् भवति स तावानेव समुन्नतः शिखरमारोहति। शक्तिशाली हि देशोऽपरं हीनशक्तिकं देशमनयासेन स्वात्मसात् करोतीति प्रत्यक्षमेव सर्वेषां, शक्तिशून्यो मानवः स्वप्नेऽपि

शत्रुं जेतुं न पारयति। किं ज्वरादिरोगग्रस्तो जनः शक्तिमता सह युद्धे विजयं लप्स्यते ? नैव नैव, हेतुरत्र शक्तेरभाव एव। अतः प्रभविष्णुभिरस्माभिः जीवनं सुखेन यापयितुं शक्तिसंग्रहोऽवश्यं करणीयः।

इदमप्यवधेयं यत् का सा शक्तिः ? कथं च सा लभ्या ? कुत्र च तस्याः स्थानम् ? यस्या अभावेन लोका अवनतेर्गर्तमनुपतन्ति। कृते विचारे शक्तिपदेन बलमेव गृह्यते लोके। तद् बलं साम्प्रतं सङ्घे एव निवसति। अस्या एव बलस्वरूपायाः शक्तेः साम्प्रतमत्यावश्यकता वरीवर्ति। सा चेयं शक्तिः करालेऽस्मिन् महाकालकल्पे कलिकाले सङ्घटनद्वारैव प्राप्तुं शक्यते, उक्तञ्च – '**नान्यः पन्थाः विद्यतेऽयनाय**'। जातिः, व्यक्तिः, सामाजिकस्थितिः, किमन्यत् सम्पूर्णदेश एव सङ्घटनाद् हि स्व-सत्तां बिभर्ति। यत्र संघटनं तत्र सर्वसम्पत्तिः, यत्र च विघटनं तत्र सर्वविपत्तिरिति निश्चितम्। पाश्चात्यदेशानां चञ्चला चमत्कृतिमती प्रगतिः सङ्घटनाश्रितैवेति प्रत्यक्षं सर्वेषाम्।

परं हन्त हन्त ! अस्माकं दुर्दशानिदानस्य चिन्तनेनैव कम्पितं जायते चेतः। महत्कष्टमापतितं यदद्य भगवतः कृपया प्राप्तायामपि स्वतन्त्रतायां वयं नैतन्महत्त्वं जानीमः। अतीतं न स्मरामः स्वदेशस्य दयनीयां दशाञ्च न पश्यामः। प्रत्युत भयात्, मोहात्, अज्ञानाद्, अन्यस्माद् वा अलक्षितात् कारणाद् भीता इव सङ्घटनात्मिकां बुद्धिं दूरतस्त्यजामः, पवित्रात्मान इव न तां स्पृशामः, भूताविष्टा इव वा व्यर्थकोलाहलमाचरामः किन्तु निश्चप्रचमिदं यत् सङ्घटने सञ्जाते एवास्माकं देशः पूर्ववत् जगद्गुरुपदमलङ्करिष्यति। परिस्थितिं पश्यन्तो वयं यदा रागद्वेषादिकं विहाय सङ्घटनस्य महत्त्वं सम्यगभिनन्दिष्यामः तदैव वास्तविकं समुन्नतपदं प्राप्स्यामः। अत्र विषये स्वनामधन्यानां श्रीशिववीरमहाराणाप्रतापादिमहापुरुषाणामाचरणम् अनुकरणीयमस्ति।

सङ्घटनद्वारा किं न भवति ? किमस्ति दुष्करं कर्म यत् सङ्घटनशक्त्या सुकरं न जायते ? अस्माकं पूर्वजानां सङ्घटन-सम्बन्धिन्यो गौरवगाथाः सम्पूर्णविश्वस्य पुनरावृत्तपृष्ठेषु सुवर्णाक्षरैरंकिताः सन्ति। पुनः किमद्य कारणं, यद् वयं स्वकीयां महतीं शक्तिं विस्मृतिगर्ते निपात्य अकर्मण्या भूत्वा तिष्ठामो निजं दिष्टं च दुष्टं घोषयन्तः शपामहे ? परं पूर्णं विश्वसिमो यत्कदाचित् समयोऽपि स समेष्यति यत्रास्माकं हृदयेषु सङ्घटनसागरसुधोर्मयो महता वेगेन स्फुरिष्यन्ति याश्च न कश्चिदपि रोत्स्यति। दिनेष्वेषु सङ्घटनशक्तेः फलं प्रत्यक्षमपि विलोक्यतेऽत्र यदिदानीं लोका असम्भवमपि कार्यं सम्भवं कुर्वन्तः सङ्घटनस्य माहात्म्यं चरितार्थयिष्यन्ति। वस्तुतः सङ्घटने एव शक्तिनिवासः।

## शब्दार्थाः

**तनयम्** – पुत्रम्

**स्तन्यम्** – दुग्धम्

**हीनशक्तिकम्** – बलरहितम्, (बलहीन को)।

**प्रभविष्णुभिः** – सामर्थ्ययुक्तैः

**यापयितुम्** - व्यतयितुं (बिताने के लिए), याप् + तुमुन्।
**अवधेयम्** - जानना चाहिए।
**अनुपतन्ति** - गिरते हैं, अनु +पत् धातु, लट् लकार, प्रथम पुरुषः, बहुवचनम्।
**वरीवर्ति** - स्वीकरोति।
**बिभर्ति** - धारणं करोति, ( भरना, व्याप्त होना) भृ धातु (जुहोत्यादिगण, लट् प्र.पु.)
**हन्त** - कष्टम्
**भूताविष्टाः** - भूतेन आक्रान्ताः, भूत + आविष्टाः (दीर्घ सन्धि)
**कलिकाले** - कलियुगे, कलिकाले, सप्तमी एकवचनम्।
**भीता** - भयावृत्ता
**निश्चप्रचम्** - सुनिश्चितम्
**विहाय** - त्यक्त्वा, वि + हा + ल्यप्।
**दुष्करम्** - कठिनम्
**सुकरम्** - सरलम्
**पुरावृताः** - पूर्ववर्णितः
**विस्मृतिगर्ते** - विस्मृतिगह्वरे
**सुधोर्मयः** - अमृततरङ्गः, सुधा +उर्मयः (गुण सन्धि)

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः–

१. 'सङ्घे शक्तिः' पाठः सङ्कलितोऽस्ति–

(क) यात्राविलासात् (ख) प्रबन्धमकरन्दात्

(ग) प्रबन्धामृतात् (घ) शास्त्रसर्वस्वात् ( )

२. 'सङ्घे शक्तिः कलौयुगे' इति कथितम्–

(क) वेदव्यासेन (ख) चाणक्येन

(ग) नवलकिशोरेण (घ) बाणभट्टेन ( )

३. 'सङ्घटनद्वारा किं न भवति'? अत्र सङ्घटनशब्दः कस्मिन् अर्थे प्रयुक्तोऽस्ति–

(क) सामूहिक–शक्तिः (ख) सैन्यशक्तिः

(ग) मनवचनकर्मभिः एकीभूता जनानां शक्तिः (घ) सामाजिकशक्तिः ( )

**४. रिक्तस्थानपूर्तिः क्रियताम्–**

(क) माताऽपि तनयं रोदनं विना न..............पाययति।

(ख) तद् बलं साम्प्रतं.............एव निवसति।

(ग) नान्यः..........विद्यतेऽयनाय।

(घ) वस्तुतः.............एव शक्तिनिवासः।

## अतिलघूत्तरात्मक-प्रश्नाः –

१. स्वभावतः एव मानवाः किं कामयन्ते ?

२. शक्तेः स्थानं कुत्र ?

३. शक्तिः कथं लक्ष्या?

४. कलौ युगे शक्तिस्वरूपं कीदृशम् ?

## लघूत्तरात्मक-प्रश्नाः–

१. पं. नवलकिशोरकाङ्करस्य परिचयं लिखत?

२. कः मानवः शत्रुं जेतुं न पारयति ?

३. अस्माकं दुर्दशानिदानं कथं भवेत् ?

## अधोलिखितवाक्येषु रेखाङ्कितान् पदान् आश्रित्य प्रश्ननिर्माणं कुरुत–

(क) <u>मानवाः</u> सर्वत्र विजयं कामयन्ते।

............................................................................ ?

(ख) शक्तिशून्यो मानवः स्वप्नेऽपि <u>शत्रुं</u> जेतुं न पारयति।

............................................................................ ?

(ग) <u>सङ्घटनशक्त्या</u> सुकरं जायते।

............................................................................?

(घ) <u>सङ्घटने</u> एव शक्तिनिवासः।

............................................................................ ?

## निबन्धात्मक-प्रश्नाः–

१. 'सङ्घटनस्य महत्त्वं' सविस्तरं लिखत ?

२. 'सङ्घे शक्तिः कलौयुगे' अस्य कथनस्य आशयं लिखत ?

३. अस्मात् पाठात् का शिक्षा मिलति' इति सविस्तारं लिखत ?

## व्याकरणात्मक-प्रश्नाः-

**१. अधोलिखितपदानां सन्धिविच्छेदं कृत्वा नामापि लेख्यम्-**

| | पदम् | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|---|
| (क) | शक्तिद्वारैव | .................. | ............. |
| (ख) | स्वप्नेऽपि | ................. | .............. |
| (ग) | भूताविष्टा | ................. | ............. |
| (घ) | याश्च | ................. | .............. |

**२. अधोलिखितेषु समस्तपदेषु नामनिर्देशपूर्वकं समासविग्रहो विधेयः-**

| | समस्तपदम् | विग्रहः | समासः |
|---|---|---|---|
| (क) | भूताविष्टाः | ............... | ............ |
| (ख) | गौरवगाथाः | ............... | ............ |
| (ग) | अभावेन | ............... | ............ |
| (घ) | शक्तिशून्याः | ............... | ............ |

**३. अधोलिखितपदानां विभक्तिः वचनञ्च लिख्यताम्-**

| | पदम् | विभक्तिः | वचनम् |
|---|---|---|---|
| (क) | जगति | ............. | ........... |
| (ख) | शक्तेः | ............. | ........... |
| (ग) | अस्माकम् | ............. | ........... |
| (घ) | कारणाद् | ............. | ........... |
| (ङ) | संघटने | ............. | ........... |

**४. निम्नलिखितेषु पदेषु प्रकृतिः प्रत्ययश्च पृथक् लिख्यताम्-**

| | पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (क) | शक्तिमान् | ...................... | ........................ |
| (ख) | जेतुम् | ...................... | ........................ |
| (ग) | करणीयः | ...................... | ........................ |
| (घ) | निपात्य | ...................... | ........................ |
| (घ) | भूत्वा | ...................... | ........................ |

५. **अधोनिर्दिष्टान् पदान् आश्रित्य वाक्यानि रचयत –**

| पदम् | वाक्यम् |
|---|---|
| (क) कश्चन् | ........................................................................................ |
| (ख) साम्प्रतम् | ........................................................................................ |
| (ग) एव | ........................................................................................ |
| (घ) अपरम् | ........................................................................................ |
| (ङ) यत् | ........................................................................................ |

६. **निम्नलिखितवाक्यानां वाच्यपरिवर्तनं कुरुत–**

(क) मानवा: सर्वत्र विजयं कामयन्ते।

(ख) बलं साम्प्रतं सङ्घे एव निवसति।

(ग) शक्तिद्वारैव सर्वं कर्तुं शक्यते।

(घ) जन: युद्धे विजयं लप्स्यते।

❀ ❀ ❀